# उपकारकाः वृक्षाः

तृतीयः पाठः



वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति। एते भूमेः उद्भवन्ति। एतेषां मूलानि पृथिव्यां दूरं दूरं **ततानि** भवन्ति। मूलानाम् उपरिष्टात् वृक्षस्य **प्रकाण्डः** भवति। प्रकाण्डात् शाखाः उद्भवन्ति। शाखाभ्यः प्रशाखाः सम्भवन्ति। एतासु प्रशाखासु एव पत्राणि पुष्पाणि फलानि च भवन्ति।

वृक्षाः अपि अस्माकम् इव **भुक्त्वा** पीत्वा च जीवन्ति। मूलानि वृक्षाणां पादाः भवन्ति। एते पादैः पिबन्ति अतएव पादपाः कथ्यन्ते। मूलानि भूमेः रसं गृहीत्वा अन्येभ्यः **अवयवेभ्यः** यच्छन्ति येन एते वृक्षाः फलन्ति। वृक्षाः अपि मनुष्याः इव सुखानि दुःखानि च अनुभवन्ति। एतेषु अपि प्राणाः भवन्ति, अतएव एते प्राणिनः इव **जायन्ते वर्धन्ते म्रियन्ते** च। परन्तु एते **अचराः** सन्ति। अर्थात् एते खग-मृग-जलचर-नराः इव न चरन्ति।

वृक्षाणां बहवः भेदाः सन्ति। एतेषु केचित् फलवृक्षाः सन्ति अन्ये च पुष्पवृक्षाः भवन्ति। वृक्षाः पर्यावरणं सन्तुलितं कुर्वन्ति। एते वर्षायै अपि सहायकाः भवन्ति। एते वातावरणं स्वच्छं कुर्वन्ति। वृक्षाः पर्यावरणे **प्रसृतान्** प्रदूषितवायून् गृहीत्वा श्वसनक्रियायै अस्मभ्यं प्राणवायुं यच्छन्ति।

वृक्षाः पत्रैः पुष्पैः फलैः छायया वल्कलैः **काष्ठैः** च सदैव प्राणिनाम् उपकारं कुर्वन्ति, अतः उपकारकाः एव एते वृक्षाः। एतैः विना अस्माकं जीवनम् असम्भवम् अस्ति। एतेषां रक्षणे एव अस्माकं जीवनस्य रक्षणम्। अतएव कथ्यते—

**रक्षणीयाः एते उपकारकाः वृक्षाः।**

## शब्दार्थाः Word-Meaning

**ततानि** – फैले हुए (spread) | **प्रकाण्डः** – तना (stem) | **भुक्त्वा** – खाकर (after eating)
**अवयवेभ्यः** – अङ्गों के लिए (for parts) | **जायन्ते** – उत्पन्न होते हैं (take birth)
**वर्धन्ते** – बढ़ते हैं (grow) | **म्रियन्ते** – मर जाते हैं (die)
**अचराः** – न चलने वाले (unmoveable) | **प्रसृतान्** – फैले हुए (spreaded) | **काष्ठैः** – लकड़ियों से (from wood)

## अभ्यासः

**1. एतानि वाक्यानि शुद्धानि अशुद्धानि वा इति पाठं पठित्वा वदन्तु लिखन्तु च–**

(i) वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति। ---------- शुद्धम् ----------

(ii) वृक्षाः भूमेः उद्भवन्ति। --------------------------------

(iii) वृक्षाः अपि भोजनं कुर्वन्ति। --------------------------------

(iv) सर्वे वृक्षाः फलानि यच्छन्ति। --------------------------------

(v) वृक्षाः अपि जायन्ते, वर्धन्ते म्रियन्ते च। --------------------------------

(vi) वृक्षाः अस्माभिः रक्षणीयाः भवन्ति। --------------------------------

**2. मञ्जूषायाः चित्वा वदन्तु लिखन्तु च वृक्षाः अस्मभ्यं किं किं यच्छन्ति–**

(i) वृक्षाः परेभ्यः ---स्वच्छवायुं----- यच्छन्ति।

(ii) वृक्षाः शीतलां ------------------ यच्छन्ति।

(iii) वृक्षाः मधुराणि ------------------ यच्छन्ति।

(iv) वृक्षाः वातावरणं ------------------ कुर्वन्ति।

(v) वृक्षाः कोमलानि ------------------ यच्छन्ति।

(vi) वृक्षाः ------------------ अतीव उपकारं कुर्वन्ति।

| |
|---|
| प्राणिनाम् |
| पुष्पाणि |
| छायाम् |
| स्वच्छम् |
| फलानि |
| स्वच्छवायुं |

**3. उचित-अर्थैः सह मेलनं कुर्वन्तु–**

(i) वृक्षाः ----------------------------------

(ii) भुक्त्वा ----------------------------------

(iii) बहवः ----------------------------------

(iv) पृथिव्याम् ----------------------------------

(v) रसम् ----------------------------------

| |
|---|
| खादित्वा |
| भूमौ |
| जलम् |
| तरवः |
| अनेके |

**4. एतेषाम् प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) वृक्षाः कस्याः उद्भवन्ति? ----------------------------------------------------

(ii) शाखाः कस्मात् उद्भवन्ति? ----------------------------------------------------

(iii) पुष्पाणि कुत्र भवन्ति? ----------------------------------------------------

(iv) मूलानि भूमेः किं ग्रहणं कुर्वन्ति? ----------------------------------------------------------------

(v) पादपाः कैः जलम् पिबन्ति? ----------------------------------------------------------------

5. **एतेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु–**

(i) वृक्षाः कथम् जीवन्ति?

--------------------------------------------------------------------------------------------------------

(ii) वृक्षाः पादपाः किमर्थम् कथ्यन्ते?

--------------------------------------------------------------------------------------------------------

(iii) वृक्षाः कथम् फलन्ति?

--------------------------------------------------------------------------------------------------------

(iv) वृक्षाः कथम् प्राणिनः इव आचरन्ति?

--------------------------------------------------------------------------------------------------------

(v) वृक्षाः कथम् प्राणिनाम् उपकारं कुर्वन्ति।

--------------------------------------------------------------------------------------------------------

6. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) **वृक्षाः** अस्माकं जीवनं सन्ति।

--------------------------------------------------------------------------------------------------------

(ii) वृक्षाणां मूलानि **पृथिव्यां** भवन्ति।

--------------------------------------------------------------------------------------------------------

(iii) प्रकाण्डात् **शाखाः** उद्भवन्ति।

--------------------------------------------------------------------------------------------------------

(iv) **वृक्षाः** प्राणिनः इव आचरन्ति।

--------------------------------------------------------------------------------------------------------

(v) **वृक्षाणां** बहवः भेदाः सन्ति।

--------------------------------------------------------------------------------------------------------

(vi) **वृक्षरक्षणे** अस्माकं जीवनरक्षणम् अस्ति।

--------------------------------------------------------------------------------------------------------

7. उदाहरणानुसारं निम्नलिखित-पदानां वर्णान् पृथक् कृत्वा लिखन्तु–

यथा– अस्माकम् – अ + स् + म् + आ + क् + अ + म्

वृक्षाः – व् + ऋ + क् + ष् + आः

(i) उद्भवन्ति – ----------------------------------------

(ii) पृथिव्याम् – ----------------------------------------

(iii) उपरिष्टात् – ----------------------------------------

(iv) प्रकाण्डः – ----------------------------------------

(v) भुक्त्वा – ----------------------------------------

(vi) गृहीत्वा – ----------------------------------------

(vii) म्रियन्ते – ----------------------------------------

(viii) खर्जूरः – ----------------------------------------

(ix) वल्कलैः – ----------------------------------------

(x) रक्षणीयाः – ----------------------------------------

## ■ मूल्यात्मकः प्रश्नः

भवन्तः अपठन् यत् वृक्षाः सदैव प्राणिनाम् उपकारं कुर्वन्ति। एतेषां रक्षणे एव अस्माकं जीवनस्य रक्षणम्। अतः भवन्तः वृक्षाणाम् रक्षणाय किं किं कुर्वन्ति?

## ■ गतिविधिः

1. स्व-स्वगृहे एकस्य पादपस्य आरोपणं कुर्वन्तु।
2. वृक्षाः अस्मभ्यं यान् पदार्थान् यच्छन्ति पुस्तिकायां तेषां नामानि लिखित्वा सङ्ग्रहं कुर्वन्तु।

## व्याकरणम्

### 'क्त्वा' प्रत्ययः

■ **पठन्तु इमां 'मम दिनचर्याम्'**



अहं प्रातः उत्तिष्ठामि। दन्तधावनं **कृत्वा** उपवनं गच्छामि। उपवने **खेलित्वा** गृहम् आगच्छामि। गृहे ईश्वरं **ध्यात्वा** पठितुं विद्यालयं गच्छामि। तत्र **पठित्वा** गृहम् आगच्छामि। गृहे पाठं **पठित्वा** सायं पुनः खेलितुं बहिः गच्छामि। तत्र मित्रैः सह उपवने **धावित्वा** व्यायामं **कृत्वा** पुनः गृहम् आगच्छामि। गृहे **स्थित्वा** कार्याणि **कृत्वा** भोजनं **खादित्वा** कथां च **श्रुत्वा** पुनः शयनाय गच्छामि। शयनकाले अहं सदा ईश्वरं **स्मृत्वा** एव शयनं करोमि।

## अभ्यासः

1. **अधुना उपरिलिखितेषु वाक्येषु येषाम् पदानाम् अन्ते 'त्वा' अस्ति तानि स्थूलपदानि चित्वा नीचैः लिखन्तु–**

| | | | |
|---|---|---|---|
| कृत्वा | (करके, after doing) | खेलित्वा | (खेलकर, after playing) |
| ------------------------ | (------------------------) | ------------------------ | (------------------------) |
| ------------------------ | (------------------------) | ------------------------ | (------------------------) |
| ------------------------ | (------------------------) | ------------------------ | (------------------------) |
| ------------------------ | (------------------------) | ------------------------ | (------------------------) |
| ------------------------ | (------------------------) | ------------------------ | (------------------------) |

'त्वा' इति अंशः संस्कृते 'क्त्वा' प्रत्ययस्य अंशः अस्ति। एते शब्दाः 'क्त्वा' प्रत्ययान्ताः शब्दाः कथ्यन्ते।

## अभ्यासः

**1. 'क्त्वा' प्रत्ययान्तानि पदानि रेखाङ्कितानि कुर्वन्तु, प्रकृति-प्रत्ययान् च पृथक् कृत्वा लिखन्तु–**

| | धातुः + प्रत्ययः |
|---|---|
| यथा– बालाः पठित्वा खेलिष्यन्ति। | पठ् + क्त्वा |
| (i) ते खेलित्वा पठिष्यन्ति। | ---------- + ---------- |
| (ii) बालाः गृहं गत्वा भोजनं खादिष्यन्ति। | ---------- + ---------- |
| (iii) सैनिकाः चौरं गृहीत्वा न्यायालयं नयन्ति। | ---------- + ---------- |
| (iv) जनाः चौरं दृष्ट्वा प्रश्नान् पृच्छन्ति। | ---------- + ---------- |
| (v) चौरः प्रश्नान् श्रुत्वा किमपि उत्तरं न यच्छति। | ---------- + ---------- |
| (vi) चौरः दुःखी भूत्वा ईश्वरं स्मरति। | ---------- + ---------- |

**2. 'क्त्वा' प्रत्ययं योजयित्वा मञ्जूषायाः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयन्तु–**

(i) राधा विद्यालयं -------------------------- (गम् + क्त्वा) पठति।

(ii) अध्यापकः प्रश्नं -------------------------- (प्रच्छ् + क्त्वा) छात्रम् पश्यति।

(iii) राधा प्रश्नस्य उत्तरं न -------------------------- (दा + क्त्वा) लज्जिता भवति।

(iv) राधा कथयति ''अहं पाठम् -------------------------- (स्मृ + क्त्वा) आगमिष्यामि।''

(v) कृषकाः कार्यं -------------------------- (कृ + क्त्वा) गृहं गमिष्यन्ति।

(vi) वयम् उदाहरणनि -------------------------- (दृश् + क्त्वा) कार्यं करिष्यामः।

मञ्जूषा: दत्वा, स्मृत्वा, दृष्ट्वा, पृष्ट्वा, गत्वा, कृत्वा

■ **यदा धातुः उपसर्गेण युक्तः भवति तदा 'क्त्वा' प्रत्ययस्य स्थाने 'ल्यप्' प्रत्ययः भवति यथा–**

| क्त्वा | ल्यप् |
|---|---|
| गम् + क्त्वा = गत्वा (जाकर) | आ + गम् + ल्यप् = आगम्य (आकर) |
| दा + क्त्वा = दत्वा (देकर) | आ + दा + ल्यप् = आदाय (लेकर) |
| स्मृ + क्त्वा = स्मृत्वा (याद करके) | वि + स्मृ + ल्यप् = विस्मृत्य (भूलकर) |
| पठ् + क्त्वा = पठित्वा (पढ़कर) | सम् + पठ् + ल्यप् = सम्पठ्य (अच्छी प्रकार पढ़कर) |

■ **ध्यानेन पठन्तु अवगच्छन्तु च–**

(i) सः उद्यानं <u>गत्वा</u> क्रीडति।

सः उद्यानात् <u>आगत्य</u> अपि क्रीडति।

(ii) सः गुरुं <u>नत्वा</u> पठति।

सः गुरुं <u>प्रणम्य</u> पठति।

(iii) बालः <u>पठित्वा</u> लिखति।

बालः <u>सम्पठ्य</u> लिखति।

(iv) सः गृहं <u>त्यक्त्वा</u> वनम् अगच्छत्।

सः सर्वं <u>परित्यज्य</u> तपस्याम् अकरोत्।

## अभ्यासः

**1. 'क्त्वा' स्थाने 'ल्यप्' प्रत्ययस्य प्रयोगं कुरुत–**

(i) रमा **हसित्वा** वदति ।

सा -------------------- (प्र + हस् + ल्यप्) वदति।

(ii) नरः भिक्षुकेभ्यः भोजनं **दत्वा** प्रसीदति।

नरः भिक्षुकेभ्यः भोजनं -------------------- (प्र + दा + ल्यप्) प्रसीदति।

(iii) सः ईश्वरं **नत्वा** कार्यं करोति।

सः ईश्वरं -------------------- (प्र + नम् + ल्यप्) कार्यं करोति।

(iv) उद्यमं **त्यक्त्वा** कार्यं न सिध्यति।

उद्यमं ----------- (परि + त्यज् + ल्यप्) कार्यं न सिध्यति।

**2. निर्देशानुसारं प्रकृति–प्रत्ययान् योजयित्वा रिक्तस्थानानि पूरयन्तु–**

(i) रामः प्रातः ------------------------ (उत् + स्था + ल्यप्) ईश्वरं नमति।

(ii) छात्राः विद्यालयं ------------------------ (गम् + क्त्वा) पाठं पठन्ति।

(iii) ते पाठं ------------------------ (स्मृ + क्त्वा) लिखन्ति।

(iv) बालः पाठं ------------------------ (वि + स्मृ + ल्यप्) दुःखी भवति।

(v) श्यामः ------------------------ (प्र + नम् + ल्यप्) श्लोकान् गायति।

(vi) सः जलम् ------------------------ (आ + दा + ल्यप्) आगच्छति।

(vii) सा ------------------------ (हस् + क्त्वा) वदति।

(viii) बालकाः ------------------------ (खेल् + क्त्वा) गृहम् आगच्छन्ति।

❊❊❊❊❊❊

# आगच्छ! भोजनं कुर्याम






(सप्तमकक्षायाः सर्वे छात्राः अध्यापिकया सह मनोरञ्जनाय 'एकम् उद्यानम्' गच्छन्ति। भोजन-काले छात्राः एकत्रिताः भवन्ति ते भोजनविषये परस्परं वार्तालापं कुर्वन्ति।)

**अध्यापिका** - भो छात्राः! युष्माभिः क्रीडनं सम्यक् कृतम् न वा?

**छात्राः** - (अति उत्साहेन) कृतम् आचार्ये! सम्यक् कृतम्।

**अध्यापिका** - तर्हि आगच्छत। अधुना मिलित्वा वयं सर्वे भोजनं करिष्यामः। **दर्शयन्तु** किं किम् अस्ति भवतां भोजने?

(सर्वे छात्राः स्वभोजनं **दर्शयन्ति**, परं कस्यापि समीपे रोटिका **शाकम्** वा न आसीत्।)

**अध्यापिका** - प्रियाः छात्राः! चिन्तयन्तु कथयन्तु च वयं भोजनं किमर्थम् कुर्मः? भोजनेन किं भवति? सुजाते! त्वं वद।

**सुजाता** - भोजनेन शक्तिः प्राप्यते। भोजनेन एव शरीरं सम्यक् कार्यं करोति।

## शब्दार्थाः: Word-Meaning

**दर्शयन्तु** – दिखाओ (to show) **दर्शयन्ति** – दिखाते हैं (they show)

**शाकम्** – सब्ज़ी (vegetables)

| | | |
|---|---|---|
| अध्यापिका | - | शोभनम्, मानव! अधुना त्वं वद-भोजनेन शक्तिः कथं प्राप्यते? |
| मानवः | - | शरीरस्य कोषिकासु या काचित् अपि दुर्बलता भवति, भोजनेन एव परिपूर्यते। |
| अध्यापिका | - | शोभनम् उक्तम्। किं येन-केन अपि भोजनेन शरीरं शक्तिपूर्णं भवति? |
| अनुजः | - | नहि आचार्ये! पौष्टिक-भोजनेन। |
| अध्यापिका | - | शोभनम्। कथयन्तु पौष्टिकं भोजनं किं भवति? |
| मनस्विनी | - | अहं कथयामि। पौष्टिकम् अर्थात् संतुलितं भोजनम्। |
| सुधीरः | - | यस्मिन् भोजने सर्वाणि तत्त्वानि स्युः। यथा— 'प्रोटीन', **वसा**, खनिजपदार्थाः, जलम्, रूक्षांशाः 'विटामिन' च इति। |



| | | |
|---|---|---|
| अध्यापिका | - | शोभनम्। एतैः तत्त्वैः किं भवति? |
| प्रगतिः | - | 'प्रोटीन' इति तत्त्वेन नवकोषिकाणां रचना भवति। 'कार्बोहाइड्रेट' वसा च इति अस्मभ्यं नवशक्तिं यच्छतः। |
| अध्यापिका | - | सुष्ठु कथितम्। आदित्य! कथयतु, खनिजपदार्थाः किं कुर्वन्ति? |
| आदित्यः | - | खनिजपदार्थैः अस्माकं शरीरं पोषणं लभते। एतेषाम् अभावे शरीरे अनेके रोगाः भवन्ति। |



| | | |
|---|---|---|
| लता | - | खनिजपदार्थेषु लौहतत्त्वम्, 'कैलेशियम्', 'पोटेशियम्', 'आयोडीन' इति तत्त्वानि भवन्ति। एतानि विना शरीरं शक्तिहीनं भवति। एतानि तत्त्वानि शाकेभ्यः फलेभ्यः दुग्धात् **लवणात्** चापि प्राप्यन्ते। |
| श्यामा | - | आचार्ये! रूक्षांशाः के भवन्ति? का च एतेषाम् उपयोगिता? |
| अध्यापिका | - | रूक्षांशाः भोजनस्य पाचनक्रियायां सहायकाः भवन्ति। एतदर्थम् **अपक्वशाकं**, फलानि, **कर्कटिका**, **चर्भटिः** आदयः प्रतिदिनं खादितव्याः। विवेक! कथय किं ज्ञातम्? |
| विवेकः | - | आचार्ये! अस्माभिः भोजने प्रतिदिनम् उचितरूपेण दुग्धं, **तण्डुलाः**, **सूपः**, घृतं, नवनीतं, रोटिका, फलानि, शाकानि च खादितव्यानि तदैव वयं स्वस्थाः भविष्यामः। |
| अध्यापिका | - | शोभनम्। सम्यक् ज्ञातम् । आगच्छत, भोजनं कृत्वा गृहं चलामः। |



(सर्वे भोजनं कृत्वा प्रसन्नतया बसयानं प्रति गच्छन्ति।)

## शब्दार्थाः : Word-Meaning

**वसा** – चर्बी (fats) | **लवणात्**-नमक से (from salt) | **अपक्वशाकं** – कच्ची सब्ज़ी (raw vegetables)
| **कर्कटिका** – ककड़ी (kakari) | **चर्भटिः** – खीरा (cucumber) | **तण्डुलाः** – चावल (rice)
| **सूपः** – दाल (pulse)

## अभ्यासः

**1. एतानि वाक्यानि शुद्धानि अशुद्धानि वा इति लिखन्तु वदन्तु च–**

(i) छात्राः क्रीडनाय गच्छन्ति। ---------- अशुद्धम् ----------

(ii) छात्राः अप्पूगृहम् गच्छन्ति। ----------------------------

(iii) वयं शक्तिं प्राप्तुं भोजनं कुर्मः। ----------------------------

(iv) भोजने सर्वाणि तत्त्वानि स्युः। ----------------------------

(v) भोजनं सर्वदा संतुलितं भवेत्। ----------------------------

(vi) शरीराय जलस्य आवश्यकता न अस्ति। ----------------------------

(vii) वयं फलानां शाकानां सेवनं कुर्याम। ----------------------------

(viii) अपक्वं शाकं न खादितव्यम्। ----------------------------

**2. मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु–**

| संतुलितं |
|---|
| शाकम् |
| खनिजपदार्थैः |
| भोजनकाले |
| शक्तिपूर्णं |

(i) छात्राः ---------------- परस्परं वार्तालापं कुर्वन्ति।

(ii) कस्यापि समीपे रोटिका ---------------- वा न आसीत्।

(iii) भोजनेन शरीरं ---------------- भवति।

(iv) ---------------- अस्माकं शरीरं पोषणं लभते।

(v) वयं ---------------- भोजनं खादित्वा स्वस्थाः भवामः।

**3. समुचितं मेलनं कृत्वा लिखन्तु–**

| | | |
|---|---|---|
| (i) रूक्षांशाः | (क) शरीरपोषणम् | ---------------------------- |
| (ii) खनिजपदार्थाः | (ख) नवशक्तिः | ---------------------------- |
| (iii) प्रोटीन | (ग) शारीरिकक्रियाः | ---------------------------- |
| (iv) कार्बोहाइड्रेट | (घ) कोषिकारचना | ---------------------------- |
| (v) विटामिन | (ङ) पाचनक्रिया | ---------------------------- |

4. **एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) छात्राः अध्यापिकया सह कुत्र अगच्छन्? ------------------------------

(ii) छात्राः कदा एकत्रिताः भवन्ति? ------------------------------

(iii) अध्यापिका छात्रान् किं दर्शयितुम् कथयति? ------------------------------

(iv) भोजनेन कासाम् दुर्बलता परिपूर्यते? ------------------------------

(v) कार्बोहाइड्रेट वसा च अस्मभ्यं किं यच्छतः? ------------------------------

(vi) खनिजपदार्थैः अस्माकं शरीरं किं लभते? ------------------------------

5. **एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु–**

(i) संतुलितभोजनं किं कथ्यते?

------------------------------------------------------------

(ii) 'प्रोटीन' इति तत्त्वेन किं भवति?

------------------------------------------------------------

(iii) 'रूक्षांशान्' प्राप्तुं किं किं खादितव्यम्?

------------------------------------------------------------

(iv) खनिजपदार्थेषु किं किम् आवश्यकम् भवति?

------------------------------------------------------------

(v) 'रूक्षांशाः' किं कुर्वन्ति?

------------------------------------------------------------

6. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) **छात्राः** मनोरंजनाय उद्यानम् अगच्छन्।

------------------------------------------------------------

(ii) **भोजनेन** शरीरं सम्यक् कार्यं करोति।

------------------------------------------------------------

(iii) 'प्रोटीन' इति तत्त्वेन **कोषिकाणां** रचना भवति।

------------------------------------------------------------

(iv) रूक्षांशा: **पाचनक्रियायां** सहायका: भवन्ति।

---------------------------------------------------------------

(v) **खनिजपदार्थै:** अस्माकं शरीरं पोषणं लभते।

---------------------------------------------------------------

## मूल्यात्मक: प्रश्न:

भवन्त: पौष्टिक-भोजनस्य विषये अपठन्। अधुना लिखन्तु भवन्त: पौष्टिक-भोजने किं किं खादन्ति?

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

## गतिविधि:

अध: प्रदत्तस्थाने पौष्टिक-भोजनस्य तालिकाया: निर्माणं कृत्वा लिखन्तु वदन्तु च यत् कस्मिन् भोज्यपदार्थे कानि तत्त्वानि भवन्ति।

### पौष्टिकं भोजनम्

| | |
|---|---|
| प्रोटीन |  |
| | |
| | |
| | |

## व्याकरणम्

### लोट्लकारः

■ ध्यानेन पश्यन्तु पठन्तु च–



गच्छ (Go)



चल (Walk)



तिष्ठ (Stop)



आगच्छ (Come)



खाद (Eat)



पठ (Read)



पिब (Drink)



लिख (Write)



वद (Speak)

**ध्यातव्यम्**

- अत्र 'गच्छ', 'चल', 'तिष्ठ' एतानि आज्ञावाचकानि क्रियापदानि सन्ति।
- आज्ञार्थे प्रार्थनायां च लोट्-लकारस्य प्रयोगः भवति।

## अभ्यासः

**1. एतानि वाक्यानि पठन्तु पूरयन्तु च–**

| | (वर्तमानकाले) | (आज्ञायाम्) |
|---|---|---|
| | लट्लकारे | लोट्लकारे |
| यथा– | त्वं गच्छसि | त्वं गच्छ |
| (i) | त्वम् आगच्छसि | त्वम् आगच्छ |
| (ii) | त्वं चलसि | त्वं ------------------------ |
| (iii) | त्वं लिखसि | त्वं ------------------------ |
| (iv) | त्वं पठसि | त्वं ------------------------ |
| (v) | त्वं पिबसि | त्वं ------------------------ |
| (vi) | त्वं खादसि | ------------------------------ |
| (vii) | त्वं वदसि | ------------------------------ |
| (viii) | त्वं तिष्ठसि | ------------------------------ |

**2. लोट्लकारे धातुरूपाणि पठन्तु लिखन्तु च–**

पठ् (लोट्लकारे)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | पठतु | पठताम् | पठन्तु |
| मध्यमः | पठ | पठतम् | पठत |
| उत्तमः | पठानि | पठाव | पठाम |

चल् (लोट्लकारे)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| ------------------- | ------------------- | ------------------- | ------------------- |
| ------------------- | ------------------- | ------------------- | ------------------- |
| ------------------- | ------------------- | ------------------- | ------------------- |

## नम् (लोट्लकारे)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| ---------- | ---------- | ---------- | ---------- |
| ---------- | ---------- | ---------- | ---------- |
| ---------- | ---------- | ---------- | ---------- |

## गम् (लोट्लकारे)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| ---------- | ---------- | ---------- | ---------- |
| ---------- | ---------- | ---------- | ---------- |
| ---------- | ---------- | ---------- | ---------- |

3. **लोट्लकारे 'पठ्' धातुरूपैः वाक्यानि रचयत–**

| | | | | | | |
| --- | --- | --- | --- | --- | --- | --- |
| **पुल्लिङ्गे -** | सः | ---------- | तौ | ---------- | ते | ---------- |
| **स्त्रीलिङ्गे -** | सा | ---------- | ते | ---------- | ताः | ---------- |
| | त्वम् | ---------- | युवाम् | ---------- | यूयम् | ---------- |
| | अहम् | ---------- | आवाम् | ---------- | वयम् | ---------- |

4. **अधोलिखितानि वाक्यानि लोट्लकारे परिवर्तयन्तु–**

(i) सैनिकाः रक्षन्ति। ------------------------------

(ii) युवाम् गच्छथः। ------------------------------

(iii) वयं नमामः। ------------------------------

(iv) त्वं कथयसि। ------------------------------

(v) ताः क्रीडन्ति। ------------------------------

(vi) सः लिखति। ------------------------------

(vii) त्वं रचयसि। ------------------------------

* * * * * *

# सुवचनानि

पञ्चमः पाठः





1. **विद्या विवादाय धनं *मदाय* शक्तिः *परेषां परिपीडनाय*।**
**_खलस्य_ साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥**

**अन्वयः** खलस्य विद्या विवादाय, धनं मदाय, शक्तिः परेषां परिपीडनाय। साधोः एतत् विपरीतं ज्ञानाय, दानाय रक्षणाय च।

**सरलार्थः** यदि दुष्टानाम् समीपे विद्या भवति तर्हि ते अस्याः उपयोगं विवादस्य (कलहस्य) कृते कुर्वन्ति, धनं प्राप्य ते अभिमानं कुर्वन्ति, शक्तेः उपयोगम् अन्येभ्यः दुःखदानाय कुर्वन्ति; परन्तु यदि सज्जनानां समीपे विद्या, धनं शक्तिः च भवन्ति तदा ते एतेषाम् उपयोगम् ज्ञानस्य कृते दानस्य कृते अन्येषां च रक्षणाय कुर्वन्ति।

## शब्दार्थाः Word-Meaning

| | |
|---|---|
| **मदाय** – अहंकार के लिए (for being proudly) | **परेषां** – दूसरों के (for others) |
| **परिपीडनाय** – सताने के लिए (to torture) | **खलस्य** – दुष्ट का (of bad person) |




2. **अयं *निजः* परो वेति गणना *लघुचेतसाम्*।**

**_उदारचरितानां_ तु वसुधैव कुटुम्बकम्॥**

**अन्वयः** अयं निजः परः वा इति गणना लघुचेतसाम्। उदारचरितानां तु वसुधा एव कुटुम्बकम्।

**सरलार्थः** अयं मम अस्ति अयम् च अपरस्य अस्ति इति निम्नश्रेण्याः मानवाः चिन्तयन्ति, परन्तु उत्तमानां मानवानां कृते तु सम्पूर्णसंसारः एव स्वपरिवारस्य तुल्यः भवति।




3. **महाजनस्य *संसर्गः* कस्य नोन्नतिकारकः।**

**पद्मपत्रस्थितं *वारि* धत्ते मुक्ताफलश्रियम्॥**

**अन्वयः** महाजनस्य संसर्गः कस्य उन्नतिकारकः न, पद्मपत्रे स्थितं वारि मुक्ताफलश्रियम् धत्ते।

**सरलार्थः** सज्जनानां मित्रता सर्वेषां जनानाम् उन्नतिं करोति। यथा कमलपत्रे स्थितं जलं मौक्तिकस्य रूपं धारयति तथा एव सज्जनपुरुषाणां मित्रतया दुष्टजनाः अपि सज्जनाः भवन्ति।

## शब्दार्थाः Word-Meaning

**निजः** – अपना (own) **लघुचेतसाम्** – छोटे हृदयवालों का/की/के (narrow minded)
**उदारचरितानाम्** – विशाल हृदयवालों का/की/के (large hearted)
**संसर्गः** – संगति (company) **वारि** – जल (water) **धत्ते** – धारण करता है (one who bears)

4. **को भार: समर्थानां, किं दूरं *व्यवसायिनाम्*।**
**को विदेश: *सविद्यानां*, क: पर: *प्रियवादिनाम्*।।**

**अन्वय:** समर्थानां भार: क:, व्यवसायिनाम् दूरं किं, सविद्यानां विदेश: क:, प्रियवादिनां पर: क:।

**सरलार्थ:** यथा शक्तियुक्तनरस्य कृते किमपि कार्यं भारं न भवति। व्यवसायिनां कृते किम् अपि स्थानं दूरं न भवति, विदुषां कृते किमपि स्थानं विदेशतुल्यं न भवति तथैव ये मानवा: प्रियवचनं वदन्ति तेषाम् कृते कोऽपि परकीय: न भवति।

## शब्दार्था: Word-Meaning

**व्यवसायिनाम्** – व्यापारियों के (of business men) **सविद्यानां** – विद्वानों के (of intellectuals)
**प्रियवादिनाम्** – प्रिय बोलने वालों के (of people with sweat tongue)

## अभ्यासः

**1. पठन्तु लिखन्तु च 'आम्' अथवा 'न'–**

(i) खलस्य विद्या ज्ञानाय भवति। ------------------------------------

(ii) सज्जनाः धनं प्राप्य दानम् अपि कुर्वन्ति। ------------------------------------

(iii) 'अयं मम अस्ति, सः परकीयः अस्ति' इति उदारजनाः चिन्तयन्ति। ------------------------------------

(iv) सज्जनानां सङ्गत्या मानवस्य उन्नतिः भवति। ------------------------------------

(v) विदुषां कृते प्रत्येकं स्थानं विदेशः इव भवति। ------------------------------------

**2. मञ्जूषायां प्रदत्त-पदैः रिक्तस्थानानि पूरयन्तु–**

| |
|---|
| मौक्तिकम् |
| व्यवसायिनाम् |
| शक्तिः |
| उदारचरितानाम् |
| ज्ञानाय |

(i) साधोः विद्या ------------------------- भवति।

(ii) खलस्य ------------------------- परेषां परिपीडनाय भवति।

(iii) कमलपत्रे स्थितं जलं ------------------------- इव भवति।

(iv) ------------------------- कृते किमपि स्थानं दूरं न भवति।

(v) ------------------------- तु वसुधैव कुटुम्बकम्।

**3. मञ्जूषायाः उचितं पर्यायपदं चित्वा लिखन्तु–**

| |
|---|
| विदुषाम् |
| अभिमानाय |
| जलम् |
| धारयति |
| पृथ्वी |

(i) वारि --------------------------------

(ii) सविद्यानाम् --------------------------------

(iii) वसुधा --------------------------------

(iv) मदाय --------------------------------

(v) धत्ते --------------------------------

**4. एतेषाम् प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) कस्य शक्तिः परेषां पीडनाय भवति? ----------------------------------------

(ii) महाजनस्य संसर्गः कीदृशः भवति? ----------------------------------------

(iii) केषाम् कृते कोऽपि परः न भवति? ----------------------------------------

(iv) उदारचरितानां कृते किं कुटुम्बकम् भवति? ----------------------------------------

(v) कस्य धनं दानाय भवति? ----------------------------------------

**5. एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु–**

(i) साधोः शक्तिः किमर्थं भवति?

---

(ii) अयं निजः परो वा इति केषाम् गणना?

---

(iii) केषाम् कृते किमपि कार्यं भारं न भवति?

---

(iv) किम् मुक्ताफलश्रियम् धत्ते?

---

(v) कस्य धनं दानाय भवति?

---

**6. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) खलस्य **धनं** मदाय भवति।

---

(ii) **महाजनस्य** संसर्गः उन्नतिकारकः भवति।

---

(iii) **व्यवसायिनां** कृते किमपि स्थानं दूरं न भवति।

---

(iv) **साधोः** विद्या ज्ञानाय भवति।

---

(v) **उदारजनाः** सम्पूर्णं संसारं स्वपरिवारतुल्यं जानन्ति।

---

7. **उचितं भावं (✓) इति चिह्नेन चिह्नितं कुर्वन्तु–**

**(क) उदारचरितानाम्–**

(i) येषां हृदयं लघु भवति। ☐

(ii) येषां हृदयं विशालं भवति। ☐

**(ख) महाजनः–**

(i) यः सर्वदा सर्वेषाम् उन्नतिविषये चिन्तयति। ☐

(ii) यः सर्वदा स्वविषये चिन्तयति। ☐

**(ग) कः परः प्रियवादिनाम्–**

(i) ये प्रियं वदन्ति सर्वे जनाः तेषां मित्राणि भवन्ति। ☐

(ii) ये जनाः केवलं मित्रैः सह प्रियं वदन्ति ते सज्जनाः सन्ति। ☐

## ■ मूल्यात्मकः प्रश्नः

**भवान्/भवती ज्ञानं प्राप्य अन्येषाम् उपकाराय किं किं करिष्यति?**

## ■ गतिविधिः

**'सत्सङ्गतिः' इति विषयम् अधिकृत्य पाठ्यपुस्तकात् भिन्नं श्लोकानाम् अन्वेषणं कुर्वन्तु कक्षायां च तेषां सस्वरं पाठं कुर्वन्तु।**

# व्याकरणम्

## शब्दरूपाणां प्रयोगः

■ **पठन्तु अवगच्छन्तु च–**

| | विभक्तयः | कारकाणि |
|---|---|---|
| **बालः** गच्छति। | प्रथमा | कर्ता |
| बालः **फलं** खादति। | द्वितीया | कर्म |
| बालः **बसयानेन** विद्यालयं गच्छति। | तृतीया | करणम् |
| सः **पठनाय** गच्छति। | चतुर्थी | सम्प्रदानम् |
| सः **वृक्षात्** फलानि त्रोटयति। | पञ्चमी | अपादानम् |
| सः **रामस्य** मित्रम् अस्ति। | षष्ठी | संबंधः |
| सः **ग्रामे** वसति। | सप्तमी | अधिकरणम् |
| **हे राम!** त्वम् कुत्र वससि? | संबोधनम् | संबोधनम् |

■ **अत्र वयम् पश्यामः यत् विभक्तिप्रयोगः कारकानुसारेण भवति। यथा—**

**(कर्तृकारकम् प्रथमा विभक्तिः)**

**बालः** पठति।

**कः** पठति?

**यः** कार्यं करोति।

**(कर्मकारकम् द्वितीया विभक्तिः)**

बालः **पुस्तकं** पठति।

बालः **किम्** पठति?

कर्ता **यत्** कार्यं करोति।

**(करणकारकम् तृतीया विभक्तिः)**

बालः **कलमेन** लिखति।

बालः **केन** लिखति?

कर्ता **येन** कार्यं करोति।

**(सम्प्रदानकारकम् चतुर्थी विभक्तिः)**

बालः **रामाय** लिखति।

**यस्मै** कार्यं करोति।

बालः **कस्मै** लिखति?

**(अपादानकारकम् पञ्चमी विभक्तिः)**

बालः **सरोवरात्** जलम् आनयति।

**यस्मात्** पृथक् अथवा दूरं भवति।

बालः **कस्मात्** जलम् आनयति?

**(सम्बन्धकारकम् षष्ठी विभक्तिः)**

बालः **रामस्य** मित्रम् अस्ति।

येन सह **यस्य** सम्बन्धः भवति।

बालः **कस्य** मित्रम् अस्ति?

**(अधिकरणकारकम् सप्तमी विभक्तिः)**

बालः **ग्रामे** वसति।

यदा **यत्र** वा क्रिया सम्पन्ना भवति।

बालः **कुत्र (कस्मिन्)** वसति?

**(सम्बोधनकारकम्)**

**हे बाल!** त्वम् पठ।

यं यां वा सम्बोध्य कथनं भवति।

**हे लते!** त्वम् कुत्र गच्छसि?

## अभ्यासः

**1. अधोलिखितेषु वाक्येषु स्थूलपदेषु प्रयुक्तां विभक्तिं कारकम् च लिखन्तु—**

| | विभक्तिः | कारकम् |
|---|---|---|
| (i) बालकाः **कन्दुकेन** क्रीडन्ति। | ----------------------- | ----------------------- |
| (ii) कृषकः **ग्रामात्** आगच्छति। | ----------------------- | ----------------------- |
| (iii) छात्राः **पठनाय** विद्यालयं गच्छन्ति। | ----------------------- | ----------------------- |
| (iv) मुनयः **पर्वतेषु** वसन्ति। | ----------------------- | ----------------------- |

(v) **रामस्य** द्वौ पुत्रौ आस्ताम्। ---------------------- ----------------------

(vi) **भो छात्राः!** अधुना पठन्तु। ---------------------- ----------------------

(vii) **भक्ताः** नमन्ति। ---------------------- ----------------------

(viii) सर्वे **संस्कृतम्** पठेयुः। ---------------------- ----------------------

**2. उचितविभक्तिप्रयोगैः रिक्तस्थानानि पूरयन्तु—**

(i) ------------------------- जिज्ञासुः आसीत्। (बालः/बालम्)

(ii) जनाः ------------------------- शक्तिं प्राप्नुवन्ति। (भोजनम्/भोजनेन)

(iii) ------------------------- विद्या विवादाय भवति। (खलस्य/खलात्)

(iv) ------------------------- त्वम् वद। (हे श्याम!/श्यामम्)

(v) छात्राः ------------------------- उद्यानं गच्छन्ति। (मनोरञ्जनम्/मनोरञ्जनाय)

(vi) जनाः ------------------------- भ्रमन्ति। (उद्यानात्/उद्याने)

(vii) ते ------------------------- नमन्ति। (अध्यापकम्/अध्यापकाय)

(viii) सः ------------------------- आगच्छति। (नगरम्/नगरात्)

******

# यस्य बुद्धिः तस्य बलम्

षष्ठः पाठः



एकस्मिन् वृक्षे एकः काकः स्वपरिवारेण सह स्नेहेन वसति स्म।



तत्र एकः सर्पः अपि वसति स्म।



काकः काकी च **शावकान्** स्नेहेन पालयतः स्म।



सर्पः एतान् शावकान् दृष्ट्वा अचिन्तयत्– ''अहम् अवश्यम् एव एतान् शावकान् भक्षयिष्यामि।''

**शब्दार्थाः** : **Word-Meaning**

**शावकान्** – (पक्षी के) बच्चों को (young ones of bird)



एकदा सः सर्पः अवसरं लब्ध्वा शावकान् अखादत्।



काकः काकी च बहुविलापम् अकुरुताम्।



काकः सर्पस्य विनाशस्य उपायम् अचिन्तयत्।



काकः काकीं कथयति– ''राजकुमारः प्रतिदिनं सरोवरे स्नानाय आगच्छति। सः स्ववस्त्राणि आभूषणानि च **अवतार्य** एकस्यां शिलायां स्थापयति। त्वं तस्य हारं गृहीत्वा सर्पस्य कोटरे **क्षिप**।'' काकी अकथयत्– ''अहम् एवम् एव करिष्यामि।''

## शब्दार्थाः Word-Meaning

**अवतार्य** – उतारकर के (after putting off) **क्षिप** – फेंक दो (throw)

एकदा अवसरं लब्ध्वा काकी राजकुमारस्य हारं गृहीत्वा कोटरे अक्षिपत्।



सैनिकाः कोटरे कृष्णसर्पं दृष्ट्वा सर्पस्य वधम् अकुर्वन् हारं च गृहीत्वा अगच्छन्।





सैनिकाः काकीम् अनुसरन्तः तत्र एव वृक्षस्य समीपम् आगच्छन्।



एवं दुष्टसर्पस्य वधः अभवत्। कृष्णसर्पं मृतं दृष्ट्वा काकः काकी च निश्चिन्तौ अभवताम्।

## अभ्यासः

**1. पाठं पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**

(i) किं काकः वृक्षे वसति स्म? ---------------------------------

(ii) किं सैनिकाः सर्पस्य विनाशस्य उपायम् अचिन्तयन्? ---------------------------------

(iii) किं सर्पः कुटीरे वसति स्म? ---------------------------------

(iv) किं राजकुमारः प्रतिदिनं सरोवरम् आगच्छति स्म? ---------------------------------

(v) किं काकी हारं कोटरे अक्षिपत्? ---------------------------------

(vi) किं काकः सर्पस्य वधम् अकरोत्? ---------------------------------

**2. मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–**

| |
|---|
| शावकान् |
| शिलायाम् |
| स्नेहेन |
| स्नानाय |
| वृक्षे |

(i) एकस्मिन् -------------------------- काकः वसति स्म।

(ii) काकः स्वशावकान् -------------------------- पालयति स्म।

(iii) सर्पः -------------------------- अखादत्।

(iv) राजकुमारः सरोवरे -------------------------- प्रतिदिनम् आगच्छति।

(v) वस्त्राणि अवतार्य -------------------------- स्थापयति।

**3. मञ्जूषायाः उचितं पर्यायपदं चित्वा लिखन्तु–**

| |
|---|
| नीत्वा |
| भुजङ्गः |
| अवलोक्य |
| पार्श्वम् |
| प्राप्य |

(i) दृष्ट्वा ---------------------------------

(ii) लब्ध्वा ---------------------------------

(iii) गृहीत्वा ---------------------------------

(iv) सर्पः ---------------------------------

(v) समीपम् ---------------------------------

**4. एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) काकः काकी च कान् स्नेहेन पालयतः स्म? ----------------------------------------

(ii) सर्पः कान् अखादत्? ----------------------------------------

(iii) राजकुमारः कुत्र वस्त्राणि स्थापयति स्म? ----------------------------------------

(iv) काकी चञ्च्वा किं धृत्वा कोटरे क्षिपति? ----------------------------------------

(v) सैनिकाः काम् अनुसरन्तः अगच्छन्? ----------------------------------------

(vi) सैनिकाः कोटरे कम् अपश्यन्? ----------------------------------------

**5. एतेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) सर्पः शावकान् दृष्ट्वा किम् अचिन्तयत्?

----------------------------------------------------------------------------------------------------

(ii) कः सर्पस्य विनाशस्य उपायम् अचिन्तयत्?

----------------------------------------------------------------------------------------------------

(iii) सर्पं मृतं दृष्ट्वा काकः काकी च कीदृशौ अभवताम्?

----------------------------------------------------------------------------------------------------

(iv) के सर्पस्य वधम् अकुर्वन्?

----------------------------------------------------------------------------------------------------

(v) वृक्षस्य कोटरे कः वसति स्म?

----------------------------------------------------------------------------------------------------

**6. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) काकः काकी च **वृक्षे** अवसताम्।

----------------------------------------------------------------------------------------------------

(ii) काकः विलापं कुर्वन्तीं **काकीम्** अपश्यत्।

----------------------------------------------------------------------------------------------------

(iii) **राजकुमारः** प्रतिदिनं सरोवरम् आगच्छति।

----------------------------------------------------------------------------------------------------

(iv) **काकी** हारम् अनयत्।

----------------------------------------------------------------------------------------------------

(v) सैनिकाः **कोटरे** कृष्णसर्पम् अपश्यन्।

----------------------------------------------------------------------------------------------------

(vi) कृष्णसर्पं मृतं दृष्ट्वा **काकः काकी** च निश्चिन्तौ अभवताम्।

----------------------------------------------------------------------------------------------------

7. **अधोलिखितवाक्यानि कथाक्रमानुसारेण लिखन्तु–**

(i) काकः काकी च स्वशावकान् स्नेहेन पालयतः स्म।

(ii) सर्पः शावकान् अखादत्।

(iii) वृक्षे काकः काकी च वसतः स्म।

(iv) तौ सर्पस्य विनाशस्य उपायम् अचिन्तयताम्।

(v) सैनिकाः सर्पस्य वधम् अकुर्वन्।

(vi) काकी चञ्च्वा हारं धृत्वा सर्पस्य कोटरे अक्षिपत्।

(i) ----------------------------------------------------------------

(ii) ----------------------------------------------------------------

(iii) ----------------------------------------------------------------

(iv) ----------------------------------------------------------------

(v) ----------------------------------------------------------------

(vi) ----------------------------------------------------------------

## ■ मूल्यात्मकः प्रश्नः

**अस्मिन् पाठे काकः स्वपरिवारेण सह स्नेहेन वसति। काकः काकी च मिलित्वा धैर्येण विवेकेन च समस्यायाः समाधानम् अकुरुताम्।**

(i) **भवन्तः कक्षायां सहपाठिभिः सह कथं वसन्ति?**

(ii) **भवन्तः जीवने आगतानां समस्यानां समाधानं कथं कुर्वन्ति?**

## ■ गतिविधिः

**पाठस्य सहायतया उचितवर्णैः रिक्तस्थानानि पूरयित्वा शब्दनिर्माणं कुर्वन्तु–**

| | | | | | | |
|---|---|---|---|---|---|---|
| का | कः | | | | | |
| को | | | | | | |
| शा | | | | | | |
| आ | | | | | | |
| भ | | | | | मि | |
| रा | | | | | | य |
| स् | व | | | | | |

## व्याकरणम्

### 'तुमुन्' प्रत्ययः

■ **अधोलिखितं संवादं ध्यानेन पठन्तु–**

(बहूनि मित्राणि मिलित्वा **भ्रमितुम्** गच्छन्ति)

रमा — मीते! त्वम् अधुना किं **खादितुम्** इच्छसि?

मीता — खादितुम् न। अहम् तु **पातुम्** इच्छामि।

रमा — कल्पने! त्वम्?

कल्पना — अहम् तु न खादितुम् इच्छामि न तु पातुम् एव इच्छामि। अहम् तु केवलम् एतत् क्रीडनकम् **क्रेतुम्** इच्छामि।

रमा — अमित! तव का इच्छा?

अमितः — अहं तु एकं खेलम् एव **खेलितुम्** इच्छामि।

मीता — अतुल! त्वम्?

अतुलः — अहम् तु एतस्य स्थानस्य शोभाम् एव **द्रष्टुम्** इच्छामि।

रमा — वन्दने! किं त्वं किञ्चित् **कथयितुम्** इच्छसि?

वन्दना — आम्।

रमा — कापि चिन्ता अस्ति?

वन्दना — न, परन्तु अहम् शीघ्रम् एव गृहं **गन्तुम्** इच्छामि।

अतुलः — किमर्थम्?

वन्दना — अद्य मम मातुलः मम गृहम् आगमिष्यति।

अमितः — अहो! एवम्।

वन्दना — आम्।

सर्वे परस्परं वदन्ति – उचितम्। वयं जलपानं कृत्वा शीघ्रम् एव चलिष्यामः।

(सर्वे जलपानं कुर्वन्ति)

**ध्यातव्यम्**

'तुमुन्' प्रत्ययस्य प्रयोगः धातुभिः सह भवति। तुमुन् प्रत्ययान्त-पदानां प्रयोगः चतुर्थी-विभक्तेः स्थाने वा कार्यकरणस्य इच्छायाः स्थाने भवति।

■ **अस्मिन् संवादे स्थूल-अक्षरैः लिखितानि पदानि अधः रिक्तस्थानेषु लिखित्वा धातुं प्रत्ययं च पृथक् कृत्वा लिखन्तु–**

उदाहरणम्– भ्रमितुम् (भ्रम् + तुमुन्)

खेलितुम् (खेल् + तुमुन्)

------------------------------------------------------------ (                    )

------------------------------------------------------------ (                    )

------------------------------------------------------------ (                    )

------------------------------------------------------------ (                    )

------------------------------------------------------------ (                    )

------------------------------------------------------------ (                    )

एतानि पदानि 'तुमुन्' प्रत्ययान्तपदानि सन्ति। (धातुः + तुमुन् = धातुः + तुम्)
'तुमुन्' प्रत्ययेन निर्मितः शब्दः अव्ययं भवति।

## अभ्यासः

1. **अधः मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयन्तु—**

(i) **माता** – सुमन! त्वम् अधुना किं -------------------- इच्छसि?

(ii) **सुमनः** – अहम् -------------------- इच्छामि।

(iii) **माता** – सुधे! त्वम्?

(iv) **सुधा** – अहम् -------------------- इच्छामि।

(v) **माता** – युवयोः का अपि उद्यानं -------------------- न इच्छति?

(vi) **सुमनः-सुधा च** – न न, अम्बे! न।

पठितुम्, लेखितुम्, कर्तुम्, गन्तुम्

2. **'तुमुन्' प्रत्ययान्तान् शब्दान् चित्वा धातुं प्रत्ययं च पृथक् कृत्वा लिखन्तु—**

हसितुं भ्रमितुं द्रष्टुं खेलितुं खादितुं तथा।
कथां श्रोतुं च स्वपितुं च मह्यं रोचते सदा।।

(i) ---------------------- हस् + तुमुन् ----------------------

(ii) --------------------------------------------------

(iii) --------------------------------------------------

(iv) --------------------------------------------------

(v) --------------------------------------------------

(vi) --------------------------------------------------

(vii) --------------------------------------------------

**3. मञ्जूषायाः उचितं 'तुमुन्' प्रत्ययान्तं पदं चित्वा वाक्यानि पूरयन्तु–**

(i) राधा जलं ------------------------- इच्छति।

(ii) अनिलः फलम् ------------------------- बहिः गच्छति।

(iii) रमा ------------------------- विद्यालयं गच्छति।

(iv) रुग्णः जनः ------------------------- इच्छति।

(v) राधा नमितां कथयति यत् अहम् अत्र ------------------------- इच्छामि।

(vi) रमा- भवती तरणसरोवरं किमर्थम् गच्छति?

(vii) सरिता- अहं तरणसरोवरं ------------------------- गच्छामि।

| जीवितुम्, नेतुम्, तर्तुम्, पठितुम्, पातुम् स्थातुम् |
|---|

**4. कोष्ठके लिखित-धातुभिः सह 'तुमुन्' प्रत्ययं योजयित्वा रिक्तस्थानानि पूरयन्तु–**

(i) अहं प्रश्नं ------------------------- इच्छामि। (प्रच्छ् + तुमुन्)

(ii) शिशुः पादाभ्यां ------------------------- इच्छति। (चल् + तुमुन्)

(iii) वयम् अधुना ------------------------- गच्छामः। (क्रीड् + तुमुन्)

(iv) सः बालकः चिकित्सकः ------------------------- इच्छति। (भू + तुमुन्)

(v) जनकः देवं ------------------------- देवालयं गच्छति। (नम् + तुमुन्)

(vi) माता भोजनं ------------------------- पाकशालायाम् अस्ति। (पच् + तुमुन्)

(vii) ते ------------------------- क्रीडाक्षेत्रम् अगच्छन्। (धाव् + तुमुन्)

******